श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये एकपञ्चाशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये एकपञ्चाशं दशकम् ॥

## अघासुरवधवर्णनम्

कदाचन व्रजशिशुभिः समं भवान्
वनाशने विहितमतिः प्रगेतराम्।
समावृतो बहुतरवत्समण्डलैः
सतेमनैर्निरगमदीश जेमनैः ॥ 51.1 ॥

विनिर्यतस्तव चरणाम्बुजद्वया -
दुदञ्चितं त्रिभुवनपावनं रजः।
महर्षयः पुलकधरैः कलेबरै -
रुदूहिरे धृतभवदीक्षणोत्सवाः ॥ 51.2 ॥

प्रचारयत्यविरलशाद्वले तले
पशून् विभो भवति समं कुमारकैः।
अघासुरो न्यरुणदघाय वर्तनीं
भयानकः सपदि शयानकाकृतिः ॥ 51.3 ॥

महाचलप्रतिमतनोर्गुहानिभ -
प्रसारितप्रथितमुखस्य कानने।
मुखोदरं विहरणकौतुकाद्गताः
कुमारकाः किमपि विदूरगे त्वयि ॥ 51.4 ॥

प्रमादतः प्रविशति पन्नगोदरं
क्वथत्तनौ पशुपकुले सवात्सके।

विदन्निदं त्वमपि विवेशिथ प्रभो
सुहृज्जनं विशरणमाशु रक्षितुम् ॥ **51.5** ॥

गलोदरे विपुलितवर्ष्मणा त्वया
महोरगे लुठति निरुद्धमारुते।
द्रुतं भवान् विदलितकण्ठमण्डलो
विमोचयन् पशुपपशून् विनिर्ययौ ॥ **51.6** ॥

क्षणं दिवि त्वदुपगमार्थमास्थितं
महासुरप्रभवमहो महो महत्।
विनिर्गते त्वयि तु निलीनमञ्जसा
नभःस्थले ननृतुरथो जगुः सुराः ॥ **51.7** ॥

सविस्मयैः कमलभवादिभिः सुरै -
रनुद्रुतस्तदनु गतः कुमारकैः।
दिने पुनस्तरुणदशामुपेयुषि
स्वकैर्भवानतनुत भोजनोत्सवम् ॥ **51.8** ॥

विषाणिकामपि मुरलीं नितम्बके
निवेशयन् कबलधरः कराम्बुजे।
प्रहासयन् कलवचनैः कुमारकान्
बुभोजिथ त्रिदशगणैर्मुदा नुतः ॥ **51.9** ॥

सुखाशनं त्विह तव गोपमण्डले
मखाशनात् प्रियमिव देवमण्डले।
इति स्तुतस्त्रिदशवरैर्जगत्पते
मरुत्पुरीनिलय गदात् प्रपाहि माम् ॥ **51.10** ॥

॥ इति श्रीमन्नारायणीये एकपञ्चाशं दशकं समाप्तम् ॥